# PRINCE HIGH SCHOOL

PIPRALI CIRCLE, SIKAR – 332001 (RAJ.) 9610672222

Website – www.princeeduhub.com, Email – princepipraliroad@gmail.com


**MODEL PAPER - I (2025-26)**

Class - X

Time: 3 Hrs. 15 Min. | Subject: Sanskrit | M.M.: 80

परीक्षार्थिभ्यः सामान्यनिर्देशाः–

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांकः अनिवार्यतो लेख्यः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेख्यानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्रैव लेख्यानि।
5. सर्वेषां प्रश्नानामुत्तराणि संस्कृतमाध्यमेनैव लेखनीयानि।

खण्ड– अ

1. बहुविकल्पात्मकप्रश्नाः **[1×18=18]**

(i) कः वातावरणं कर्कशध्वनिना आकुलीकरोति ?

(अ) पिकः (ब) काकः

(स) मयूरः (द) बकः

(ii) कृशकायः कः आसीत् ?

(अ) न्यायाधीशः (ब) आरक्षी

(स) रक्षापुरुषः (द) अभियुक्तः

(iii) पिता पुत्राय बाल्ये किं यच्छति ?

(अ) गुप्तधनम् (ब) दण्डम्

(स) विद्याधनम् (द) भूभागम्

(iv) कस्य उपशमनस्य स्थिरोपायः नास्ति ?

(अ) जलप्लावनस्य (ब) युद्धस्य

(स) भूकम्पस्य (द) जनसंख्यायाः

(v) मनुष्यः किं कृत्वा नावसीदति ?

(अ) उद्यमम् (ब) आलस्यम्

(स) धैर्यम् (द) उद्योगम्

(vi) कस्य शोभा एकेन राजहंसेन भवति ?

(अ) कूपस्य (ब) सरसः

(स) गृहस्य (द) भवनस्य

(vii) अरे अहिभुक्! नृत्यातिरिक्तं का तव विशेषता ? अत्र रेखांकितपदस्य प्रसङ्गानुसारं कोऽर्थः ?

(अ) काकः (ब) बकः

(स) मयूरः (द) मृगः

(viii) निर्धनः जनः <u>भूरि</u> परिश्रम्य वित्तमुपार्जितवान्। अत्र रेखांकितपदस्य प्रसङ्गानुसारं कोऽर्थः ?

(अ) अल्पम् (ब) बहुधा

(स) पर्याप्तम् (द) न्यूनतम्

(ix) 'बहूनि + अपत्यानि' इत्यस्य सन्धिपदम् अस्ति—

(अ) बहून्यापत्यानि (ब) बहून्यपत्यामि

(स) बहून्यपत्यानि (द) बहून्यापत्यामि

(x) विसर्गसन्धेः उदाहरणमस्ति—

(अ) वागीशः (ब) बालो हसति

(स) सच्चित् (द) सुध्युपास्य

(xi) 'यदुक्तम्' इत्यस्य सन्धिविच्छेदोऽस्ति—

(अ) यत् + ऊक्तम् (ब) यत् + क्तम्

(स) यत् + उक्तम् (द) यत + उक्तम्

(xii) 'उपकृष्णम्' इति पदे कः समासः ?

(अ) बहुव्रीहिः (ब) द्वन्द्वः

(स) अव्ययीभावः (द) कर्मधारयः

(xiii) 'स्पृहेरीप्सितः' इति पदयोगे का विभक्तिः भवति ?

(अ) द्वितीया (ब) तृतीया

(स) चतुर्थी (द) पञ्चमी

(xiv) 'कृते' इति पदयोगे का विभक्तिः भवति ?

(अ) तृतीया (ब) चतुर्थी

(स) पञ्चमी (द) पष्ठी

(xv) 'अनन्तरम्' इति पदयोगे का विभक्तिः भवति ?

(अ) पञ्चमी (ब) षष्ठी

(स) सप्तमी (द) चतुर्थी

(xvi) ..............................पुस्तकानि पठ्यन्ते। अत्र पूरणीयं समुचितपदं किम्।

(अ) अहम् (ब) त्वया

(स) अस्मभ्यम् (द) बालकाः

(xvii) मम पिता प्रातः (7.45)...........................क्षेत्रे गच्छति। अत्र समुचितसमयवाचकं शब्दं किम् ?

(अ) पादोनाष्ट (ब) सपादाष्ट

(स) पादोनसप्त (द) सार्धसप्त

(xviii) <u>अहं</u> सह मम मित्रम् अपि गमिष्यति। रेखांकितपदस्य शुद्धरूपं किम् ?

(अ) आवाम् (ब) वयम्

(स) अस्मान् (द) मया

2. **निर्देशानुसारं रिक्तस्थानानि पूरयत—** **[6]**

(i) सा............................ मधुरं गायति। (बालक+टाप्)

(ii) तेन पुस्तकं.....................। (पठ्+अनीयर्)

(iii) मुनिः पुनरपि विशदी........................... अकथयत्। (कृ+शतृ)

(iv) अहं...................... जयपुरं गमिष्यामि। (ह्यः,श्वः)

(v) .......................... क्रियां न विदधीत। (सहसा,अधुना)

(vi) ग्रामात्.................... नदी प्रवहति। (बहिः,एव)

3. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

अस्मिन् संसारे असंख्याः भाषाः सन्ति। तासु भाषासु संस्कृत भाषा सर्वोत्तमा विद्यते। संस्कृता परिष्कृता दोषरहिता भाषा एव संस्कृत भाषा कथ्यते। इयमेव भाषा देवभाषा, गीर्वाणगीः, सुरवाणी इत्यादिभिः शब्दैः संबोध्यते। एतानि नामानि एव अस्याः भाषायाः महत्त्वं सूचयन्ति। संस्कृतभाषा जगतः सर्वासां भाषाणां जननी अस्ति। सर्वभाषाणां मूलरूप ज्ञानाय, एतस्या आवश्यकता भवति। तादृशं महत् साहित्यं संस्कृतभाषायाः अस्ति तादृशं अन्यासां भाषाणां नास्ति। अस्यामेव भाषायां ब्राह्मण–ग्रन्थाः आरण्यकाः अध्यात्मविषयप्रतिपादिका उपनिषदः वेदादयश्च सन्ति। आदिकाव्यं रामायणं वीरकाव्यं महाभारतमपि संस्कृतस्य गौरव वर्धयतः। अनयोः ग्रन्थयोः विषयं गृहीत्वा एव विशालस्य (संस्कृत) साहित्यस्य रचना संजाता।

(क) एकपदेन उत्तरत– **[1×2=2]**

(i) सर्वोत्तमा भाषा का विद्यते ?

(ii) वीरकाव्यं किम् कथ्यते ?

(ख) पूर्णवाक्येन उत्तरत– **[2]**

(i) कीदृशी भाषा संस्कृतभाषा कथ्यते ? तथा संस्कृतभाषा कैः शब्दैः संबोध्यते ?

(ग) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत– **[1]**

(घ) भाषिककार्यम् **[3]**

(i) संस्कृतभाषा जगतः सर्वासां भाषाणां जननी अस्ति। अस्मिन् वाक्ये क्रियापदं किम्।

(ii) 'सर्वासां भाषाणां' अनयोः पदयोः विशेषणपदं किम् ?

(iii) 'अस्याः भाषायाः महत्त्वं सूचयन्ति।' इत्यत्र 'अस्याः' सर्वनामपदं स्थाने संज्ञापदं लिखत।

## खण्ड–ब

4. अधोलिखितयोः वाक्ययोः अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम्। **[2]**

(i) अहं प्रातःकाले (8.45)................................ विद्यालयं गच्छामि।

(ii) बालकाः सायंकाले (6.30)................................ क्रीडाक्षेत्रे क्रीडन्ति।

5. 'गुरवः नमः।' इति वाक्यं संशोधयत। **[2]**

6. अस्माभिः ग्रन्थः पठ्यते। इति वाक्यस्य वाच्यपरिवर्तनं कृत्वा लिखत। **[2]**

7. 'अष्टाध्यायी' इति पदस्य विग्रहं कृत्वा समासस्य नामापि लिखत। **[2]**

8. अधोलिखितश्लोकस्य सप्रसंगं भावार्थं लिखत। **[2]**

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।

परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।

9. अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत। **[2]**

एक एव खगो मानी वने वसति चातकः।

पिपासितो वा म्रियते याचते वा पुरन्दरम्।।

अन्वयः– एक एव मानी खगः (i)............................ वने (ii)............................। (सः) वा पिपासितः (iii)......................... पुरन्दरम् (iv)................... वा।

(वसति, चातकः, याचते, म्रियते)

## खण्ड– स

10. अधोलिखितं रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत– **[3]**

(i) न्यायाधीशः बंकिमचन्द्रः आसीत्।

(ii) संसारे विद्वांसः ज्ञानचक्षुभिः नेत्रवन्तः कथ्यन्ते।

(iii) चातकः वने वसति।

11. ''जननी तुल्यवत्सला' इति पाठस्य सारं हिन्दीभाषायां लिखत– **[3]**

अथवा

'सौहार्दं प्रकृतेः शोभा'' इति पाठस्य सारं हिन्दीभाषायां लिखत–

12. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्। पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा। एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं किञ्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

(क) एकपदेन उत्तरत– **[1]**

(i) निशान्धकारे प्रसृते कुत्र पदयात्रा न शुभावहा ?

(ख) पूर्णवाक्येन उत्तरत– **[2]**

(i) निर्धनः जनः किमर्थं व्याकुलो जातः ? सः स्वपुत्रं कुत्र प्रवेशं दापयितुं सफलो जातः ?

(ग) भाषिककार्यम् **[2]**

(i) ''तेन स्वपुत्रं एकस्मिन्..................।'' अत्र 'तेन' इति सर्वनामपदं स्थाने संज्ञापदं लिखत।

(ii) ''सः बसयानं विहाय पदातिरेव प्राचलत्। अत्र ''सः इति कर्त्तापदस्य क्रियापदं लिखत।

अथवा

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नद्यमानः अवर्तत। सः वृषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः।

(क) एकपदेन उत्तरत – [1]

(i) कृषकः किं कुर्वन्नासीत् ?

(ख) पूर्णवाक्येन उत्तरत – [2]

(i) वृषभः कुत्र पपात ?

(ग) भाषिककार्यम् – [2]

(i) 'कश्चित् कृषकः' इत्यत्र विशेषणपदं किम् ?

(ii) 'क्रुद्धः कृषीवलः तमुत्थापयितं बहुवारं यत्नमकरोत्।" इत्यत्र क्रियापदं किम् ?

13. अधोलिखितं पद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

वाक्पटुधैर्यवान् मन्त्री सभायामप्यकातरः।

स केनापि प्रकारेण परैर्न परिभूयते।।

(क) एकपदेन उत्तरत– **[1]**

(i) मन्त्री सभायां कीदृशः भवेत् ?

(ख) पूर्णवाक्येन उत्तरत– **[2]**

(i) कीदृशः मन्त्री केनापि प्रकारेण परैः न परिभूयते ?

(ग) भाषिककार्यम् **[2]**

(i) 'वाक्पटुधैर्यवान् मन्त्री' अत्र विशेष्यपदं किम् ?

(ii) 'साहसी' इति पदस्य पर्यायपदं लिखत।

अथवा

उदीरितोऽर्थः पशुनापि गृह्यते,

हयाश्च नागाश्च वहन्ति बोधिताः।

अनुक्तमप्यूहति पण्डितो जनः,

परेङ्गितज्ञानफला हि बुद्धयः।।

(क) एकपदेन उत्तरत – [1]

(i) उदीरितोऽर्थः केन गृह्यते ?

(ख) पूर्णवाक्येन उत्तरत – [2]

(i) के बोधिताः भारं वहन्ति ?

(ग) भाषिककार्यम् – [2]

(i) 'अश्वाः' इति पदस्य पर्यायपदं लिखत।

(ii) 'पण्डितः जनः' इत्यत्र विशेषणपदं किम् ?

**14. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि लिखत–**

काकः–अरे! अरे! किं जल्पसि ? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः ? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा– 'अनृतं वदसि चेत् काकः दशेत्– इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम् अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

पिकः– अलम् अलम् अतिविकत्थनेन। किं विस्मर्यते यत्–

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।

वसन्तसमये प्राप्ते काकः काकः पिकः पिकः।।

(क) एकपदेन उत्तरत– **[1]**

(i) काकचेष्टः विद्यार्थी कीदृशः छात्रः मन्यते ?

(ख) पूर्णवाक्येन उत्तरत– **[2]**

(i) कस्य सत्यप्रियता जनानां कृते उदाहरणस्वरूपा अस्ति ?

(ग) भाषिककार्यम् **[2]**

(i) अरे! अरे! किं जल्पसि ? अत्र क्रियापदं किम् ?

(ii) 'काकचेष्टः' इति विशेषणपदस्य विशेष्यपदं लिखत।

**अथवा**

(सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ।)

विदूषकः – इत इत आर्यौ!

कुशलवौ – (रामस्य समीपम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य ?

रामः – युष्मद्दर्शनात् कुशलमिव। भवतोः किं वयमत्र? कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनसमुचितस्य कष्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः। (आसनार्धमुपवेशयति)

उभौ – राजासनं खल्वेतत्, न युक्तमध्यासितुम्।

रामः – सव्यवधानं न चारित्रलोपाय। तस्मादङ्क – व्यवहितमध्यास्यतां सिंहासनम्। (अङ्कमुपवेशयति)

(क) एकपदेन उत्तरत – [1]

(i) कुशलवौ कस्य कुशलं पृच्छतः ?

(ख) पूर्णवाक्येन उत्तरत – [2]

(i) रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः कीदृशः आसीत् ?

(ग) भाषिकार्यम् – [2]

(i) "अध्यास्यतां सिंहासनम्" इत्यत्र क्रियापदं किम् ?

(ii) "पात्रम्" इति पदस्य पर्यायपदं किम् ?

## खण्ड– द

15. भवान् रमणः विद्यालयस्य शिक्षणशुल्कं दातुं समर्थो नास्ति। स्वविद्यालयस्य प्रधानाचार्याय शुल्कमुक्त्यर्थं प्रार्थना–पत्रं लिखत – **[4]**

अथवा

भवान् गिरीशः। भवान् स्वमित्रं प्रदीपं प्रति परीक्षायां सफलतायै वर्धापन्नं पत्रं मञ्जूषायां प्रदत्तपदसहायता पूरयित्वा लिखत।

(सुहृद्वर्य, प्रणामं, जयपुरतः, कुशलं, वर्धापन्नं, एवमेव, परीक्षायाम्, अधिगतवान्)

(i).....................................

दिनांकः– 24.11.2025

अभिन्नहृदय (ii)..................

सप्रेमनमस्ते।

अत्र (iii)........................ तत्रास्तु। अद्यैव तव पत्रं प्राप्तम्। त्वं प्रथम–श्रेणियां (iv)...................... उत्तीर्ण योग्यतासूच्यां प्रथमं स्थानम् (v)....................... इति पठित्वा हर्षमनुभवामि। तव प्रयासः सर्वदा साधुवार्दाहः। मम (vi)........................ स्वीकरोतु। आशासे अग्रेऽपि (vii)................ स्तुत्यप्रयासं करिष्यति।

स्वपितृभ्यां मम (viii)......................... निवेदय।

तव स्निग्धं मित्रम्

गिरीशः

16. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायता संस्कृतेन अष्ट–वाक्यानि निर्माय लिखत। **[4]**

(रक्षाबन्धनदिवसे, शोभायात्रायाम्, फलकानि, संस्कृतदिनम्, पंक्तिः, वदतु, संस्कृतम्, आनन्देन, सर्वासां भाषाणां, जननी)



अथवा

मञ्जूषातः उपयुक्तपदानि गृहीत्वा 'गुरुशिष्ययोः' मध्ये क्रीडायाः विषये संवादं पूरयत।

(सह, करोषि, बहुलाभम्, आवश्यकता, क्रीडाङ्गणे, क्रीडायाम्, अधुना, अध्ययनम्)

अध्यापकः– प्रवीण! त्वम् अत्र किं (i)..................... ?

प्रवीणः— हे गुरो! अहं (ii)..................... किमपि न करोमि।

अध्यापकः— तर्हि गच्छ। तव मित्राणि तत्र (iii)....................... क्रीडन्ति, तैः (iv)......................... क्रीड।

प्रवीणः— मम (v)........................... रुचिः नास्ति। अतः अहं न क्रीडामि।

अध्यापकः— स्वस्थशरीरस्य स्वस्थमनसः च कृते क्रीडायाः अस्माकं जीवने महती (vi).....................भवति।

प्रवीणः— यदि अहं क्रीडायां ध्यानं दास्यामि तर्हि मम (vii)....................... बाधितं भविष्यति।

अध्यापकः— क्रीडायै स्वल्पसमयम् एव प्रयच्छ। अल्पसमयः अपि शरीराय (viii)................... प्रदास्यन्ति।

17. अधोलिखितेषु वाक्येषु केषाञ्चित् चतुर्णां वाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत। **[4]**

(i) राधा भोजन पकाती है।

(ii) गाँव के चारों ओर खेत हैं।

(iii) जननी और जन्मभूमि स्वर्ग से भी महान् हैं।

(iv) हिमालय से गंगा निकलती है।

(v) हम दोनों जल पीते हैं।

(vi) जल के बिना जीवन सम्भव नहीं है।

18. अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखत। **[3]**

(i) सः प्रतिदिनम् बहून् पशून् हत्वा खादति स्म।

(ii) एकदा यदा शशकस्य क्रमः आगतः, तस्य विलम्बागमनेन सिंह कुपितः जातः।

(iii) सिंह : जले स्वप्रतिबिम्बं दृष्ट्वां तस्मिन् कूपे अकूर्दत्।

(iv) कस्मिंश्चित् वने एकः सिंहः वसति स्म।

(v) तदा सर्वे पशवः विचारं कृत्वा प्रतिदिनं सिंहस्य पार्श्वे एकं पशुं प्रेषयितुं निश्चितवन्तः।

(vi) तदा चतुरः शशकः सिंहः कूपस्य समीपम् अनयत्।

(vii) अतः लोके प्रसिद्धं 'बुद्धिर्यस्य बलं तस्य' इति।

अथवा

अधः मञ्जूषायां प्रदत्तशब्दानां सहायता संस्कृतेन षड्वाक्यानि ''धेनु—महिमा'' इति विषये लिखत।

(कामधेनुः, दुग्धम्, पोषयति, श्रीकृष्णः, गोमूत्रम्, माता, नवनीतम्, पञ्चामृतम्)

❑❑❑❑